Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 1 | ISSN : 2581- 6306

# माध्यमिक शिक्षाया: व्यावसायिकरणम्

डॉ. आरती शर्मा
सहायकाचार्यः, शिक्षापीठः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय, नवदेहली

**Article Info**

**Publication Issue :**
January-February-2023
Volume 6, Issue 1

**Page Number :** 150-153

**Article History**
Received : 01 Jan 2023
Published : 20 Jan 2023

**शोधसार:** - शिक्षाया: व्यावसायिकरणं नितान्तमावश्यकमस्ति। अनेन जनेषु वृत्ते: क्षमताया: विकास: भविष्यति एवञ्च कुशलानां कर्मकाराणां या चेष्टा भवति, तस्या: आपूतिर्भविष्यति। कार्यमिदं तादृशानां छात्राणां कृते बहुलाभप्रदं भविष्यति, ये रुच्याभावे अनुद्देश्येन उच्चशिक्षां प्राप्नुवन्ति। उद्देश्यरहिता उच्चशिक्षाऽपि मानवं कुशल जीवन-यापनाय न सिद्धयति, राष्ट्रियोत्पादनेऽपि सहायिका न भवति। एनामेव न्यूनतां मनसि निधाय शिक्षाया: व्यावसायिकरणोपरि बलं दीयते। माध्यमिक शिक्षाया: व्यावसायिकरणोपरि तु विशेषबलं दीयते। अत: एव केन्द्रसर्वकारेण 1988 तमे वर्षे +2 स्तरे माध्यमिक शिक्षाया: व्यावसायिकरणस्य योजना आरब्धा। अस्या: निर्देशनाय **'संयुक्त व्यावसायिक शिक्षा परिषद्'** इत्यस्य निर्माणं कृतम्। अनया परिषदि बहूनां विद्यालयानां कृते व्यावसायिकं पाठ्यक्रमं आरभतुम् अनुमति: दत्वा इयं शिक्षा अग्रे सारिता। शोधलेखेऽस्मिन् माध्यमिक शिक्षाया: व्यावसायिकरणस्यावश्यकतानामुद्देश्यानां महत्व विषये विचारिष्यते, तत: अनुभूयमानां समस्यानां-समाधानोपायानां विषये चर्चा करिष्यते ।

**मुख्यशब्दा:**- माध्यमिक, शिक्षा, प्राथमिक, व्यावसायिकरणम्, छात्रा:, देश:।

**विषय प्रवेश:** - माध्यमिक शिक्षाया: अभिप्राय: भवति-मध्यगत शिक्षा अर्थात् प्राथमिक एवं उच्च शिक्षयो: मध्ये दीयमाना शिक्षा। स्वातन्त्र्यानन्तरं भारतीयसंविधाने धर्मनिरपेक्षलोकतान्त्रिकगणराज्यरूपेण यदसङ्कल्प: विहित तदा शिक्षाया क्षेत्रेऽस्मिन् महती भूमिका भविष्यति, एतदर्थं शिक्षाव्यवस्थायां बालकेषु चारित्रिकगुणानां विकसनमपेक्षितमस्ति येन ते स्वकीयं दायित्त्वं निर्वोढुं शक्या: भवेयु:, इति चिन्तितम्। सहैव विचारितम् यत् भारते साधनानां सत्वेऽपि निर्धनताकारणाज्जना: सामान्यं जीवनं यापयितुमक्षमा: भवन्ति, एतदर्थं उत्पादनशक्तेर्विकासस्य राष्ट्रियसम्पत्तेश्च वृद्धेरावश्यकता वर्तते, येन जनानां जीवनस्तरमुन्नतं भवेत्। अत: एव माध्यमिक शिक्षाया: व्यावसायीकरणं कृतम्।

व्यावसायीकरणस्यार्थ: भवति - किमपि कार्यं व्यवसायरूपप्रदानम्। अत: शिक्षाया: व्यावसायीकरणमित्यस्य अर्थ: भविष्यति - व्यवसायविषये प्रशिक्षणम् अर्थात् छात्राणां कृते एकस्य व्यवसायस्य विषये विशेष प्रशिक्षणम्, येन छात्रा: स्वजीवनयापनं सुगमतारूपेण सञ्चालयितुं समर्था: भवेयु:। आर्थिक-सामाजिकजीवनयो: विभिन्नपक्षेभ्य: सम्बधित व्यवसायसन्दर्भे विभिन्नानां कौशलानां तकनीकाञ्च व्यावहारिकं ज्ञानप्रदानं शिक्षाया: व्यावसायीकरणस्य मुख्योद्देश्यं वर्तते। प्राथमिकशिक्षाप्राप्तेरनन्तरं छात्रा: यदि उच्चशिक्षा पर्यन्तं पठितुमक्षमा: सन्ति, तर्हि तेषां कृते माध्यमिकस्तरे एकस्मिन् व्यवसाये सिद्धताऽपेक्षते, येन स: उच्चशिक्षाया: अभावेऽपि स्वीयाजीविकां पालयितुं समर्थ: भवेत्। इति धिया शिक्षाया: व्यावसायीकरण सन्दर्भे माध्यमिकस्तरस्य एव चयनं कृतम् एवं चिन्तितं

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

यत् सामान्यशिक्षाया: पाठ्यक्रमेषु व्यावसायिकं ज्ञानस्य, विविध कौशलानां, तकनीकानाञ्च योजनं करणीयम्, येन छात्रा: शिक्षाप्राप्तेरनन्तरं जीवकोपार्जने सक्षमा: भवेयु:। ब्रिटिशकालेऽपि शिक्षाया: व्यावसायिकरणोपरि बलं दत्तमासीत्। सर्वादौ 1853 तमे वर्षे वुड डिस्पैच महोदय: व्यावसायिक शिक्षाया: आह्वानं कृतवान्। तत: 1882 तमे वर्षे हण्टर आयोगेन, 1929 तमे वर्षे हटॉग समित्या, 1937 तमे वर्षे वुड एवट रिपोर्ट माध्यमेन एवं 1944 तमे वर्षे सार्जेन्ट योजनया अपि शिक्षाया: व्यावसायीकरणस्य आवेदनं कृतम्। स्वतन्त्रताया: पश्चात् 1952 तमे वर्षे मुदालियराऽयोगेन आवेदनमिदम् अग्रे चालितम्, यस्मिन् कृषि:, शिक्षणं, चिकित्सा, अभियान्त्रिकी इत्यादि शिक्षाया: विस्तारीकरणे बलं दत्तम्। भारतीय शिक्षाऽऽयोगेनापि विचारितम् यत् विद्यालयस्तरीय शिक्षायां भविष्ये साधारण शिक्षा एवं व्यावसायिक शिक्षाया: सुखद सम्मिश्रणं भविष्यति। साधारणशिक्षायां पूर्व व्यावसायिकं तकनीकीतत्त्वानि च (Pro- vocational and Technical Elements) सम्मिलिता: भविष्यन्ति एवं व्यावसायिकी शिक्षा स्वस्मिन् साधारणशिक्षाया: तत्त्वं स्थास्यति। उभयो: शिक्षयोर्मध्ये पृथकत्त्वं भवितुमेव नार्हयिष्यति।

**माध्यमिक शिक्षाया: व्यावसायिकरणस्यावश्यकता:**

(1) सामाजिक समायोजने विकास:

(2) राष्ट्रस्यार्थिक विकास:

(3) नैतिकमूल्यानां विकास:

(4) अवृत्ते: (बेरोजगारी) समस्याया: समाधानम्।

(5) विद्यार्थीनां विभिन्न योग्यतानामभिरुचीनाञ्च विकास:।

(6) शिक्षामुद्देश्यपूर्णम् निर्मातुम्।

(7) राष्ट्रस्योत्पादेयताया: विकास:

शिक्षाया: व्यावसायीकरणम् इत्युक्ते अवृत्ते: (Jobless) समस्याया: परिहारं कृत्त्वा मानव तथा योग्यं विधास्यति, येन स: समाजे उचितं स्थानं प्राप्नुयात् एवं समाजस्य महनीय सदस्य रूपेण स्वीयां भूमिकां निर्वहेत्।

राष्ट्रस्योत्पादेयताया: विकास: तस्यार्थिकविकासे निहितमस्ति। अस्माकं राष्ट्रे प्राकृतिकसाधनानां न्यूनता नास्ति, परन्तु तेषां प्रयोगाभावे विदेशी जना: तेषां लाभं प्राप्नुवन्ति अथवा ते नष्टा: जायन्ते, एतदेव कारणमस्ति यत् अस्माकम् आर्थिकस्थिति: न्यूना विद्यते। अस्माकं देश: औद्योगीकरणं प्रति अग्रसरं तु अस्ति, परन्तु कुशलकर्मकाराणामभावे व्यवसायेषु वाञ्छितप्रगति: नैव दरीदृश्यते। एतस्य मुख्यकारणम् अस्माकं शिक्षापद्धते: पुस्तकीयत्त्वं, अव्यावहारिक व्यावसायीकरणत्वमस्ति। शिक्षाया: व्यावसायीकरणम् एतादृशेभ्य: दोषेभ्य: दूरं करिष्यति एवञ्च देशस्य आर्थिक विकासस्य मार्गमुद्घाटयिष्यति।

प्रायश: निर्धनता अवत्तेश्च आपराधिकप्रवृत्तिं वर्धयन्ति एवञ्च मानवं नैतिकपतनं प्रति अग्रसारयति। यदि देशस्य युवा शिक्षामाध्यमेन व्यावसायिक कुशलता प्राप्य समाजे यशपूर्वकं जीवनयापनं करोति, तर्हि स: स्वत: एव नैतिक विकासं प्रति प्रेरित: भविष्यति।

महात्मा गांधी महोदयेनोक्तं यत् – 'वास्तविकी शिक्षा सा एव या अवृत्तिं प्रति बीमा भवेत्।' माध्यमिक शिक्षाया: व्यावसायीकरणेन एतादृशी समस्याया: परिहार: भविष्यति। एवञ्च शिक्षाया: व्यावसायिकरणं छात्रान् सक्रियं कृत्त्वा शिक्षां सार्थकमुद्देश्यपूर्णञ्च विधास्यति। राष्ट्रस्योपादेयताया: विकासदृष्ट्याऽपि कोठारी आयोगेन शिक्षाया: व्यावसायिकरणस्य महत्वं प्रदर्शयन्त: उक्तं यत्– "राष्ट्रस्योपादेयतां वर्धयितुं माध्यमिक शिक्षां प्रवलं व्यावसायिकं रूप (मोड) दानमत्यन्तमावश्यकमस्ति।

**माध्यमिक शिक्षाया: व्यावसायीकरणस्योद्देश्यानि -**

(i) माध्यमिक शिक्षाया: व्यावसायीकरणेन ग्रामीणविकसनं रोजगारोपलाब्धश्च। वृत्तेरोपलब्धिश्च

(ii) अवृते: निर्धनताया: परिहारस्य राष्ट्रियलक्ष्याणां प्राप्त्यर्थं सहायता प्रदानम्।

(iii) उत्पादनाय, राष्ट्रियविकासस्य प्राप्त्यर्थं शिक्षाप्रदानम्

(iv) औद्योगिक क्षेत्राणां कृते कुशलकर्मकाराणां निर्माणम्।

(v) उच्च शिक्षायां केवल योग्य छात्राणां कृते एव प्रवेशकरणम्।

(vi) छात्रेषु व्यावसायिक पाठ्यक्रमाणां प्रति रुच्योत्पादनम्।

(vii) स्ववृत्यर्थं बालकानां सन्नद्धीकरणम्।

(viii) अल्पवयसि एव छात्राणां कृते व्यवसायप्राप्तुमवसरकल्पनम्।

(ix) श्रमस्य प्रति निष्ठाया: विकसनम् सामाजिकपरिवर्तनानयम्।

(x) छात्रेषु अन्तर्निहितानां विभिन्नयोग्यतानाम् अभिरुचीनाञ्च विकास:।

**माध्यमिक शिक्षाया: व्यावसायीकरणस्य महत्वम् -** माध्यमिक शिक्षाया: व्यावसायीकरणेन अवृत्ते: (बेरोजगारी) समस्याया: समाधानं भविष्यति। आर्थिकदृष्ट्या छात्रा: अल्प- वयसि एव स्वावलम्बिन: भविष्यति, आत्मनिर्भराश्च भविष्यन्ति। छात्राणां श्रमं प्रति सम्मानभावना वर्धिष्यति। छात्रेषु उत्पादनशीलताया: गुणस्य विकास: भविष्यति। ते उपलब्धानां संसाधनानामुचितप्रयोगे पारङ्गता: भविष्यन्ति। गृहोद्योगानां वृद्धिर्भविष्यति एवञ्च सर्वे मिलित्वा राष्ट्रियोत्पादनवृद्धौ योगदानं करिष्यन्ति।

माध्यमिकस्तरे मुख्य व्यावसायिक क्षेत्राणि –

- ❖ कृषि: – कृषिविज्ञानम्, मुर्गीपालनम्, मत्स्यपालनम्, पशुपालनम्, अर्थशास्त्रम्।
- ❖ वाणिज्य: – कार्यालयप्रबन्धनम्, लेखापालनम्, बीमा, आयातं- निर्यातम्।
- ❖ गृहविज्ञानम् – आहारसंरक्षणम्, पोषाहारम्, गृहप्रबंधन, शिशुपालनम्, बेकरी, कुकरी, पाककला
- ❖ पैरा चिकित्सा – दंतचिकित्सा, फार्मेसी, नर्सिंग
- ❖ तकनीकी – संगणककुशलता, यानपरिष्कार:, ग्राम्यतकनीक्य:, स्वच्छताकार्यम्
- ❖ अन्य: – चित्रकला, नृत्यम्, संगीत, यात्री संकेतक (ट्यूरिस्ट गाइड), फोटोग्राफी (चित्रारेखक), सौन्दर्यप्रसाधक (ब्यूटीशियन)

**माध्यमिक शिक्षाया: व्यावसायीकरणे अनुभूता: समस्या: –**

- संसाधनानामभाव:
- छात्राणामरुचि:
- उचितपाठ्यक्रमाभाव:
- सैद्धान्तिकपक्षस्योपरि अधिकं महत्त्वम्
- व्यावहारिकज्ञानोपरि न्यूनं बलम्
- प्रशिक्षित शिक्षकाणामभाव:
- प्रयोगाशालानामुचित व्यवस्थाया: अभाव:।

- धनराशेः उचितोपयोगे शिथिलता

माध्यमिकस्तरे व्यावसायिकशिक्षां प्रदातुं सर्वासु संस्थासु विद्यालयेषु पर्याप्तसंसाधनानि न भवन्ति, येन व्यावसायिक शिक्षाप्रदाने समस्याः अनुभूयन्ते। ये व्यावसायिकपाठ्यक्रमाः पाठ्यन्ते, तेषु उचित पाठ्यवस्तुनः सामञ्जस्यं नास्ति, येन छात्राः रुचिं नैव प्रदर्शयन्ति। तेषां रुचिः व्यावसायिक शिक्षायाः अपेक्षया सामान्यशिक्षां प्रति भवति। व्यावसायिक पाठ्यक्रमेषु सैद्धान्तिक पक्षस्योपरि अधिकं बलं दीयते, व्यावहारिक पक्षस्योपरि न्यूनम् अर्थात् व्यवसाय सम्बन्धी व्यावहारिकं ज्ञानं न्यूनं दीयते, येन ते व्यवसाये सम्यक्तया कुशलतां प्राप्तुं नैव शक्नुवन्ति। कदाचित विद्यालयेषु प्रशिक्षित एवं योग्याध्यापकानामभावेऽपि विषयस्य सम्यक्तया सम्प्रेषणं नैव भवति। प्रयोगशालानामभावेऽपि छात्राः सम्यक्तया परीक्षणं कतुमर्हाः न भवन्ति, स्वयं कृत्वाऽधिगन्तुमवसरः नैव प्राप्यते तैः। एतादृशानां व्यावसायिक पाठ्यक्रमाणां कृते सर्वकारेण यद् धनं दीयते, तस्य सम्यक् उपयोगः प्रबन्धकैः नैव क्रियते, येन सुचारुरूपेण व्यावसायिकपाठ्यक्रमचालने बहव्यः समस्याः अनुभूयन्ते।

एतादृशानां समस्यानां कृते केचनोपायाः भवितुमर्हन्ति। यथा यदि व्यावसायिक विद्यालयानां पृथकव्यवस्था क्रियते चेत् छात्राणां मनः सामान्य शिक्षां प्रति आकृष्टो नैव भविष्यति, सहैव व्यावसायिक पाठ्यक्रमेषु परिष्कारः करिष्यते, भाषासम्बन्धिनः पाठाः ततः निष्कास्यन्ते, प्रायोगिकाभ्यासाः अधिकाः दीयन्ते चेत् पाठ्यक्रमः व्यावहारिकः भवितुमर्हति। पाठ्यक्रमे सैद्धान्तिक-प्रायोगिक उभयोः पक्षयोः उपरि सममेव बलं दीयते एवञ्च छात्राणां मूल्याङ्कनम् उभयविधं क्रियते चेत छात्राः व्यावसायिकपाठ्यक्रमं प्रत्यपि रुचिं वर्धिष्यन्ति। सर्वकारेणापि प्रयोगशालानां, संसाधनानां कृते उचितधनराशिः प्रदेया एवञ्च सर्वकारेण यत् धनमेतदर्थं दीयते, प्रबन्धकैः तस्य समुचितोपयोगः करणीयम्। व्यावसायिक शिक्षा निमित्तं कुशलानां प्रशिक्षितानञ्च अध्यापकानां नियुक्तिः करणीया, येन ते छात्रान् व्यवसायं प्रति रुचिं जागरेयुः, निपुणं च कुर्युः।

**निष्कर्षः** - वयं वक्तुं शक्नुमः यत् माध्यमिक शिक्षायाः व्यावसायिकरणं सर्वकारस्य महत्त्वपूर्णं कार्यमस्ति। अनेन भारतदेशे अवृत्तेः (बेरोजगारी) समस्यायाः निराकरणं भविष्यति। छात्राः स्वावलम्बिनः भविष्यन्ति, ते यदा वाञ्छन्ति तदैव स्वरोजगारं कर्तुं शक्याः भविष्यन्ति। राष्ट्रस्यार्थिकविकासः भविष्यति। एतदर्थमावश्यकमस्ति यत् माध्यमिक स्तरे शिक्षायाः व्यावसायीकरणानिमित्तं केन्द्र एवं राज्यसर्वकारैः यद् धनं दीयते, या आर्थिकी सहायता प्रदीयते, तस्य सदुपयोगः करणीयम्।

**सन्दर्भग्रन्थ सूची -**


1. गुप्ता, डॉ. अरुणा, समकालीन भारत एवं शिक्षा, ठाकुर पब्लिशर्स, लखनऊ, 2015-16
2. वशिष्ठ, डॉ. राजेश, जोशी, डॉ. प्रेमलता, समकालीन भारत शिक्षा, लक्ष्मी पब्लिकेशन्स, नई दिल्ली, 2019
3. यादव, डॉ. हलधर, गुप्ता, डॉ. अरुणा, गुप्ता, डॉ. वंदना, समकालीन भारत एवं शिक्षा, Generic पब्लिकेशन्स, ऑनलाइन, 2018
4. सक्सैना, डॉ. स्वाति, शिक्षा के सिद्धांत, आगरा विनोद पुस्तक मंदिर ।
5. वर्मा, डॉ. रामपाल सिंह, पाठ्यक्रम, शिक्षण-कला एवं मूल्यांकन, आगरा, विनोद पुस्तक मंदिर ।
6. त्यागी, डॉ. गुरसरनदास, शिक्षा के सिद्धांत, आगरा, विनोद पुस्तक मंदिर,
7. यादव, डॉ. सीयाराम, पाठ्यक्रम विकास, आगरा: विनोद पुस्तक मंदिर ।